International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(3): 353-355
© 2022 IJSR
www.anantaajournal.com
Received: 26-03-2022
Accepted: 02-05-2022

**डॉ० शिव कुमार मिश्रः**
सेवा निवृत्त संस्कृतविभागाध्यक्षः
कुँवरसिंह महाविद्यालयः,
लहेरियासराय, ल०ना०मि०
विश्वविद्यालय, दरभंगा, बिहार, भारत

**Corresponding Author:**
**डॉ० शिव कुमार मिश्रः**
सेवा निवृत्त संस्कृतविभागाध्यक्षः
कुँवरसिंह महाविद्यालयः,
लहेरियासराय, ल०ना०मि०
विश्वविद्यालय, दरभंगा, बिहार, भारत

# मिथिलायाः व्याकरणपरम्पराः

**डॉ० शिव कुमार मिश्रः**

**प्रस्तावना**

मिथिलाया व्याकरणशास्त्र परम्परामाधृत्य
शोधात्मकं नैसर्गिकं सटीकं च विविच्यते मया।
अस्ति उदीच्यां दिशि भारतस्य नृपालपार्श्वे हिमशैलकुक्षौ।
पुरातनी विश्रुतपुण्यशब्दा महापुरी तीरहुती च नाम्ना।।

यत्र दुराचारिणः सदाचारिभिः सदा मथ्यन्ते सेयं 'मिथिला' उणादिगणपठितेन मिथिलादयश्चेति सूत्रेण 'मथ्यन्ते रिपवो यत्र' इत्यस्मिन् अर्थे मन्थ विलीडने धातोः सिद्धयति। अस्याः मिथिलायाः तैरभुक्त्यादीनि द्वादशनामानि बृहद्विष्णुपुराणनीयमिथिलामाहात्म्ये वर्णितानि। तेषु द्वादशेषु नामसु मिथिला, तैरभुक्तिः (तीरभुक्ति–तीरहुति–तिरहुतिर्वा) वैदेहश्चेति निवासत्वाज्जनपवत्वाद्वा 'तस्य निवास' (4.2.69) इति पाणिनिसूत्रेण अणिकृते निष्पन्नो वैदेह इति शब्दः।
कथयति केचिद् आर्यसंस्कृतेः प्रसाराय प्राक्तना ऋषयः गत्रहिमवतीर्मध्ये सदानीरायाः पश्चिमतटे समुपागताः। क्रमशश्च ते पूर्वतटेऽपि आगत्य स्वकीयं कार्यक्षेत्रं स्थापयामास। तैस्तत्र यज्ञादिकमपि कृतम्, अतः हवनादिकार्येण पूतेयं भूमिः तैरभुक्तिरिति नाम्ना ख्याता। यथा मिथिलामहात्म्येऽपि वर्णितमस्ति–

गंगा–हिमवतोर्मध्ये नदी पंचदशान्तरे।
तैरभुक्तिरिति ख्यातो देशः परमपावनः।।

अयमपि अस्ति एकः सिद्धान्तमः यत् गंगा–गण्डकी–कौशिकीनां नदीनां तटेषु स्थिता भूमिः तीरभुक्तिः, सा च तिरहुतिरपि। अस्यापि तिरहुतिशब्दस्य प्रकृतिभूतः शब्दस्तीरभुक्तिरेव। यतो हि 'क ग च ज ट ड त द प ब य वानां प्रायो लोपः इति प्राकृतव्याकरणसूत्रेण ककारलोपः सूत्रान्तरानुसारेण च भकारस्य हकारः भवति। भविष्यपुराणे वर्णितं यद् इक्ष्वाकोः पुत्रो निमिः स्वभुजबलेन तैरहुतस्य समीपे एकं नगरं स्थापयामास, यस्य नाम 'मिथिला' इति जातम्। वशिष्ठशापान्निमिः विदेहोऽभूत् ततः पुनः मथनान्मिथिः मिथिलो वा जातः, पुरीजननसामर्थ्यात् मिथिः जनकनाम्नाऽपि ख्यातः। इदानीमियं मिथिलाद्वयोः नेपाल–भारतदेशयोः विभक्ता, अस्यैकदेशः कदा नैपालदेशे तिरोभूतो जातः, न निश्चितः। परन्तु अस्याः सीमांकनं यदस्ति प्रसिद्धं, तत् मिथिलाभाषाया इयं प्रसिद्धिः विश्रुता–

गंगा बहथि जनिक दक्षिण दिशि पूर्वकौशिकी धारा
पश्चिम बहथि गण्डकी उत्तर हिमवत् वल विस्तारा।
कमला त्रियुगा अमृता धेमुरा वारामती कृत सारा
मध्य बहथि लक्ष्मणा प्रभृति से मिथिला विद्यागारा।।

सेयं मिथिला भारतदेशान्तर्गतविहारप्रान्तस्योत्तरस्यां दिशि विभिन्नेषु मण्डलेषु अष्टादशजनपदेषु विभक्ता, एकः प्रभागो विद्यते।
ब्राह्मण–रामायण–महाभारत–पुराणादिषु आकरेषु ग्रन्थेषु प्राक्तनसाहित्यग्रन्थेषु च अस्याः वैशिष्ट्यं पुण्यदेशत्वं च सम्यग्गुणवर्णितमस्ति। बृहद्विष्णुपुराणे तु अस्या माहात्म्यं सुविस्तरं प्राप्यते। अत्रत्यानि विभिन्नानि, तीर्थस्थानानि, विश्वमित्रविभाण्डक– याज्ञवल्क्य–वाल्मीक्यादीनां तपः पूतर्षीणामाश्रमाः, चाणक्य–बाण– कालिदासवररुचि– उदयनाचार्य– मण्डनमिश्रवाचस्पति– गणेशोपाध्याय– जयदेव–भानुदत्तादीनां मनीषिणां जनकभूमयः ताभिरेवेयं मिथिला तीर्थानामाकरः समजायत।

अस्यां उमासीतयोः जन्मभूमौ मृतानां मुक्तिलाभोऽपि भवतीति प्रसिद्धिः तथा चेयं मिथिला स्वयं रामस्वरूपिणी अपि वर्त्तते। अस्तु।
सर्वेषु शास्त्रेषु दर्शनेषु मिथिलाया अप्रतिहता गतिः वर्त्तते, ग्रन्थप्रणयनपरम्परा, व्याख्यापद्धतेर्निरन्तरागतिः शास्त्रार्थसामर्थ्या (समर्था) मतिः वर्त्तन्ते। तत्र व्याकरणशास्त्ररचनापरम्परायामपि मैथिलाचार्याणां कृतीनां न संख्या नगण्या, अपि तु इदानीमपि नवीनाचार्यैः तस्यां परम्परायां ग्रन्थादिकं क्रियते। तेषु एवाऽत्र मया केषांचिद् वैयाकरणानां नामानि ग्रन्थनामानि च निर्दिश्य तेषामतिसंक्षिप्तः परिचयः प्रस्तूयते।
यद्यपि पाणिनीयेतरे व्याकरणे सन्ति सर्वप्रथमगण्याः सुप्रसिद्धाः षोडशशतकस्य खष्टाब्दस्य आचार्यपद्मनाभमिश्राः व्याकरणदर्श सुपद्मपजिका– प्रयोगदीपिका– परिभाषावृत्ति–यङ्लुग्वृत्तीत्यादीनां रचयितारः, परन्तु प्रबोधचन्द्रिकाकारः पंचदशशतकस्य वैजलभूपतिः, पल्लवप्रदीपकारः विश्वेश्वरमिश्रः (षोडशशताब्देः), सुपघव्याकरणस्य मकरन्दव्याख्याकारः आचार्यविष्णुमिश्रः, बालबोधकारो नरहरिश्वाऽपि न विस्मरणीया सन्ति। पाणिनीयेतरे व्याकरणे अन्येऽपि आचार्याः सन्ति, येषां नामानि अत्र समुल्लेख्यानि सन्ति। कातन्त्रव्याख्याकारोमापतिः लक्ष्मणसेनाऽऽश्रितः द्वादशे शतके विक्रमाब्दे जातः, अस्मिन्नेव समये अन्योऽभूत्पृथ्वीधरः वर्धमानकृतकातन्त्रविस्तरस्योपरि व्याख्यायाः कर्त्ता। सारस्वतव्याकरणेऽपि वासुदेवाचार्यशिष्यः चण्डेश्वरः अन्यतमो वर्त्तते। सौपघप्रक्रियामनुसृत्य कन्दर्पशर्म्मणा भट्टिकाव्यस्य टीका विरचिता–

> सौपघानां प्रीतये भट्टिकाव्ये टीकां धीरकन्दर्पशर्मा।
> विद्यासागरटीकायां कातन्त्रप्रक्रिया यतः।
> सुपघप्रक्रिया तस्मात्तस्मादेव प्रणीयते।।

मिथिलायां मधुबनीजनपदे 'कन्दर्पीघाट' (घाटः तटः तीरो वा, कमलनद्याः) इति नाम्ना प्रसिद्धः। कातन्त्रव्याकरणे च सुप्रसिद्धस्य वैयाकरणस्य भैरवमिश्रस्य पित्रा भावोपनामकेन भवदेवमिश्रेण परिभाषावृत्तिः निर्मिता। एतादृशा एव वर्त्तन्ते संस्कृतेतरवैयाकरणेषु अन्यतमाः विद्वांसः तद्यथा– विक्रमसभानवरत्नो वररुचिः (प्राकृतप्रकाशकारः), पउमकोशरचयिता एकादशखृष्अशतकस्य बहराजः, षोडशशतकस्य कृष्णदासमिश्रः, येनाचार्येण संस्कृते सूत्रबद्धं कृतं पारसीभाषाव्याकरणं पारसिकप्रकाशेति नामकम्। प्राकृतव्याकरणे अस्ति षड्भाषाचन्द्रिकायाः महत्वपूर्णं स्थानम्, अस्य रचयिता लक्ष्मीधरोऽपि मिथिलाया एव विभूतिरासीत्। अन्यः धनेश्वरोपाध्यायः सारस्वतव्याकरणे सारस्वतप्रदीपनामकस्य ग्रन्थस्य क्षेमेन्द्र मतखण्डनमपरनामकस्य रचनामकरोत्। अयं धनेश्वरः पंचदशशतखृष्टवर्षस्य सारसंग्रहकारस्य पीताम्बरव्याऽन्तेवासी आसीत्। हिन्दी मैथिली– भाषयोः वैयाकरणेषु मुख्याः सन्ति पं० दीनबन्धुझाः शर्मा, आचार्य रामलोचनशरणः, भोलालालदासः, पं० रमानाथझाः, प्रो० गंगापतिसिंहः, पं० गोविन्दझाः, पं० युगेश्वरझाः, प्रो० आनन्दमिश्रः, डा० बालगोविन्दझाः व्यथितादयः। प्राचीनकालादेव अत्र पाणिनीव्याकरणस्य परम्पराविकासः प्रवर्त्तते, यत्राऽस्ति, प्रथमो वैयाकरणः आचार्यवररुचिकात्यायनः वार्त्तिककारः।

### 1. आचार्यो वररुचिकात्यायनः–

वार्त्तिककारोऽयं वररुचिः योगीश्वरस्य याज्ञवल्क्यस्य कात्यायनस्य पौत्रः, स्मृतिकारस्य कात्यायनस्य पुत्रः, विक्रमपूर्वं अष्टाविंशतिशतवर्षादपि प्राग् आसीत्। अनेन हि वार्त्तिकं, कातन्त्रकृवन्तभागं, वाररुचं काव्यं, भ्राजसंज्ञकश्लोकानि लिखितानि। अस्माद्भिन्नेन अपरेण वररुचिना अष्टाध्यायीवृत्तिः, निरुक्तसमुच्चयः, लिंगविशेषविधिः पत्रकौमुद्यादयः ग्रन्थाः प्रणीताः। अपरोऽयं वररुचिः खृस्तपूर्वप्रथमशताब्दौ उज्जयिनिनरेशस्य विक्रमादित्यस्य सभासदः कविकुलगुरुकालिदासस्य सहयोगी मित्रं चासीत्।

### 2. मण्डनमिश्रः –

भीमांसकप्रवराणां कुमारिलभट्टानां शिष्योऽयं मिश्रापाश्को मण्डनः षट्त्रिंशत्कारिकायाः स्फोटसिद्धेः कर्त्ता सहर्षामण्डलस्य माहिष्मती ग्रामवास्तव्यश्चासीत्। 'स्वतः प्रमाणं परतः प्रमाणमित्यादि लोकोक्तिः अनेनैव सम्बद्धास्ति।

### 3. हलायुधशर्मा (द्वादशशतोत्तरत्रिंशद्विक्रमाब्दे)–

राष्ट्रकूटवंशस्य कृष्णराजतृतीयस्य सभापण्डितोऽयं सोदरतुरवंश प्रवर्त्तकः शाण्डिल्यगोत्रीयः आसीत्। आख्यातानामर्थबोधकस्य कविरहस्यस्य (द्विशतोत्तरचतुःसप्ततिश्लोकनिबद्धस्य) क्रियाविशेष्यताग्रन्थस्य च कर्त्ता हलायुधः कविरहस्ये कथयति 'धातुपारायणाम्भोधिपारीत्तीर्णधीः'।

### 4. वररुचि उपाध्यायः (एकादशशतके खृस्ताब्दे)–

वार्त्तिककाराष्टाध्यायीवृत्तिकाराभ्यां वररुचिभ्यां भिन्नोऽयं वररुचिः प्रयोगविवेक–प्रयोगसंग्रहयोः ग्रन्थयोः प्रणेता। अस्यैवव वररुचेरवरजो आसीत् धातुवृत्तेः भाषावृत्तिपंजिकयोः च रचयिता। मीमांसकेतरो विश्वरूपोपाध्यायः।

### 5. गोवर्द्धनाचार्यः (विक्रमसंवत्–द्वादशशतके)–

> गोवर्द्धनश्च शरणो जयदेव उमापतिः।
> कविराजश्च रत्नानि समितौ लक्ष्मणसेनस्य।।

आर्यासप्तशतीकारः गोवर्द्धनाचार्योऽयं नीलाम्बरस्यात्मजः बलभद्रपण्डितस्याग्रजः, उदनाचार्यस्य च गुरुः आसीत्। अनेन हि उणादिसूत्रस्योपरि एकाऽद्वितीया वृत्तिः रचिता।

### 6. भरतमिश्रः–

मण्डनोत्तरवर्ती भरतमिश्रोऽपि मण्डनमिश्र इव स्फोटसिद्धेः रचयिता, अस्य स्फोटसिद्धौ प्रत्यक्षार्थाऽऽगमरूपास्त्रयः परिच्छेदः सन्ति। ग्रन्थस्यास्य कारिकाव्याख्ययोः भागयोः अयमेव कर्त्ता, ग्रन्थोऽयं त्रिवेन्द्रमतः प्रकाशितः।

### 7. नन्दनमिश्रः–

अज्ञातकालिकोऽयं नन्दनमिश्रः मिथिलायाः धनेश्वरमिश्रस्य पुत्र आसीत्। काशिकावृत्तौ जिनेन्द्राचार्यस्य न्यासव्याख्या तथा तस्योपरि मैत्रेयरक्षितस्य तन्त्र–प्रदीपनामनी द्वे व्याख्ये प्रसिद्धे स्तः। अस्मिन्तन्त्रप्रदीपे एवाऽनेन उद्दीपनमिति नामकं व्याख्यानं कृतमासीत्। पाण्डुलिपिरियं कलिकाताया राजकीये पुस्तकालये सुरक्षिता वर्त्तते।

### 8. नरपतिमिश्रः–

**चतुर्वशपंचदशयोः शतकयोः मध्ये स्थितेन नरपतिमिश्रेण न्यासोपरिन्यासप्रकाशः कृतः–**

> नरपतिकृततिरेषा कामिनी नन्दिनीव
> गुरुतमकृततोषा नाशिताशेषदोषा।
> सुललितगतिबन्धा निर्जिताशेषतेजा
> जयति जगदुपेता मालिनी जा×वीव।।

**वैयाकरणोऽयं महाकवेः विद्यापतेः प्रेरणया एव न्यासप्रकाशः रचितवान्–**

> विद्यापतेः प्रेरणकारणेन कृतो मया व्याकरणप्रकाशः।
> यद्यत्र किंचित्स्खलनं भवेन्मे क्षन्तव्यमीषदगुणिनां वरैस्तत्।।

### 9. उदयनाचार्यः–

यद्यपि व्याकरणस्येतिहासे ग्रन्थे युधिष्ठिरेण मीमांसकेन अयं नैयायिकादुदयनाद् भिन्नः निर्दिष्टः, परन्तु उदयनविरचितस्याऽष्टाध्यायीवृत्तेः मितवृत्यर्थसंग्रहस्य बाह्याभ्यन्तरप्रमाणैः निर्विवादत्वेनोदयनः मैथिलाचार्य एव प्रतीयते, येन न्यायादिशास्त्रेष्वपि पुस्तकानि विरचितानि।

### 10. जगद्धरशर्मा (त्रयोदशशतोत्तरपंचाशत् खृष्टवर्षात्प्राक्)–

मीमांसकमहोदयानुसारेण स्वपुत्रं यशोधरं पाठयितुं अनेन कातन्त्रस्य बालबोधिनीवृत्तिः लिखिता। वेणीसंहारमालतीमाधवादीनां नाटयग्रन्थानां टीकाकाराज्जगद्धरादभिन्नोऽयं जगद्धरः इति 'डेट् आफ जगद्धरः'

आंग्ललेखात् प्रतीयते। इदमपि ज्ञायते यत् बालबोधिनीटीकाकारः शितिकण्ठोपाध्यायः अस्यैव जगद्धरस्य नप्तृकन्यातनयातनूज आसीत्।

**11. चक्रपाणिदत्तः–**

**प्रक्रियाकौमुद्यां प्रक्रियाप्रदीप– टीकाकारोऽयं चक्रपाणिदत्तः बीरेश्वराचार्यस्य शिष्य आसीत्–**

विरोधिनां तिरोभावभाव्यो यद् भारतीभरः।
वीरेश्वरं गुरुं शेषवंशोत्तसं भजामि तम्।।
अनेन हि आचार्येण प्रौढमनोरमाखण्डनं चापि लिखितम्–
दरितरिपुवक्षीऽन्त्रं सचक्रपाणिं नरहरिं नत्वा।
विद्वन्मण्डलह्रदयं तत् परमतखण्डनं तनुते।।

अस्य प्रौढ़मनोरमाखण्डनस्योद्धारः भट्टोजिदीक्षितस्य पौत्रेण हरिजिदीक्षितेन शब्दरत्नव्याख्यायां कृतः।

**12. गंगादासझाः–**

वाक्यपदीयस्य व्याख्याकारोऽयं कृष्णदासात्मजः कुजिलवारमूलक–कात्यायनगोत्रीयश्चासीत्। व्याख्याने भणितमनेन– ''इति पण्डितगंगादासविरचिते सम्बन्धोद्देशः षष्ठस्तद्धितोद्देशः समाप्तः।'' व्याख्येयमपूर्णा भाण्डारकरप्राच्यविद्यामहासंस्थाने च सुरक्षिता वर्त्तते।

आचार्येन्द्रदत्तोपाध्यायः यद्यपि प्रखरो वैयाकरण आसीत्, सिद्धान्तकौमुद्याः फक्किकाप्रकाशव्याख्या, शब्दतत्त्वप्रकाशश्च विरचितवान्, किन्तु दौर्भाग्यादस्य कापि कृतिः साम्प्रतं नोपलभ्यते, परं तस्य विचाराः परवर्त्तिभिः विद्वद्भिः स्वग्रन्थेषु गृहीताः उद्धृताश्च। अज्ञातकालस्य प्रवर्त्तकोपाध्यायस्य महाभाष्यप्रदीपप्रकाशिका, नारायणस्य षोडशशतकस्यान्तेस्थितस्य महाभाष्यप्रदीपविवरणम्, आचार्यरुद्रधरस्याज्ञातकालस्य अष्टाध्यायीवृत्तिः, षोडशखृस्तशताब्द्याः वासुदेवमिश्रस्य अष्टाध्यायी–काशिकासारवृत्ती, षोडशशतखृस्तवर्षस्य कलाधरोपाध्यायस्य शब्दकौस्तुभव्याख्या, अष्टादशशतकस्य गोकुलनाथोपाध्यायस्य पदवाक्यरत्नाकारः गिरिधरोपाध्यायस्य विभक्त्यर्थनिर्णयः, होरिलशर्म्मणः पूर्वपक्षावली, अकलोपाध्यायस्य शब्दविचारः, जीवनाथशर्मणः परिभाषार्थमंजरी। विद्याकरमिश्रस्य शब्देन्दुशेखरप्रकाशः, धनेश्वरोपाध्यायस्य पातंजलमहाभाष्योपरि चिन्तामणिव्याख्या, वाचस्पतेः शब्दनिर्णयः, राज्ञः नरेन्द्रसिंहस्य शब्दरूपावली, भैरवमिश्रस्य सिद्धान्तकौमुदी लघुशब्देन्दुशेखरयोः चन्द्रकलाव्याख्या भूषणसारपरीक्षा च, जगन्नाथमिश्रस्य पदवाक्यरत्नाकरव्याख्या, धर्मदत्तापरनामकस्य बच्चाझाः शर्म्मणः व्युत्पत्तिवादटीका, जुडाओनझाः शर्म्मणः महाभाष्यविमर्शः, मुक्तिनाथठक्कुरस्यापि महाभाष्यव्याख्या, झोपाश्स्य विकलोपनामकस्य हेमपतेः शब्दप्रदीपः, तेजनाथझाः, शर्म्मणः संस्कृतव्याकरणविनोदः, ऊनविंशतिशताब्द्याः रत्नपाणेः कारकवादः षट्कारविचारश्च, झोपाश्स्य हर्षनाथस्य मममातामही मातामहस्य लघुशब्देन्दुशेखरदीपकः, परिभाषार्थदीपकः, मनोरमाभावदीपकः शब्दरत्नार्थदीपकश्च, श्रीकृष्णसिंहठक्कुरस्य पदार्थनिर्णयः, जयदेवमिश्रस्य परिभाषेन्दुशेखर 'विजया' व्युत्पत्तिवादस्य 'जया' शास्त्रार्थरत्नावली च, झोपाख्यस्य परमेश्वरस्य उष्मविवेकटीकाप्रयोगदर्पणश्च, खुद्दीझाः शर्म्मणः नागेशोक्तिप्रकाशो (ल० श० व्याख्या, परिभाशेन्दुशेखरटीका) तिङर्थवादसारश्च, शशिनाथझाः शर्म्मणः विभक्त्यर्थप्रकाशिका, परमलघुमंजुषाटीका च मिथिलायाः व्याकरणसम्बन्धिन्यः नितान्तमविस्मरणीयाः कृतयः सन्ति।

अन्येऽपि बहवः वैयाकरणः, शास्स्त्रार्थिनः, व्याख्याकाराः ग्रन्थकाराश्च बभूवुः। तेषु उल्लेखनीयाः सन्ति ऊनविंशशताब्द्याः भावकौतुककारो रविनाथझाः शर्मा, सिद्धान्तकौमुदी–गूढफक्किकामर्मवृत्त्पिरिभाषेन्दुशेखरव्याख्यादीनां रचयिता हरिशंकरझाः शर्मा, भूषणसारदीपिका–समासशक्तिदीपिकाउपसृष्टधात्वर्थसंग्रह– बकारविवेक–लिंगवचनविचारदीनां ग्रन्थानां प्रणेता दीनबन्धुझाः शर्मा, समासशक्तिवाद– पदवाक्यरत्नाकरदीपिकयोः कर्त्ता यदुनाथमिश्रः, वाक्यपदीयप्रकाशिकाकारः द्रव्येशझाः शर्मा, परमलघुमंजुषावाक्यपदीययोः तत्त्वप्रकाशिकाकारः कृष्णमाधवझाः शर्म्मा, महाभाष्यविमलाटीका –स्फोटवाद– शब्दद्रव्यत्ववादानां रचयिता महेशझाः, सिद्धान्तकौमुदीचन्द्रिकाकारः चन्द्रधारीसिंहः, परिभाषेन्दुशेखरव्याख्याकारः रमेशझाः, व्याकरणकौतुकाकारः जीवनाथझाः, परमलघुमंजुषातत्त्वप्रकाशिका विवृतिकारः चन्द्रमाधवझाः शर्मा, ज्ञापकादर्शकारः मणिनाथझाः शर्म्मा, मनोरमारत्नप्रकाश–लघुमंजुषाप्रकाश–महाभाष्यादर्शादीनां रचयिता सुखदेवझाः, शर्मा, स्फोटविचारकारः मार्कण्डेयमिश्रः, परमलघुमंजूषाटीकाकारः किशोरीझाः शर्मा, सलघुमध्यसिद्धान्तकौमुदीनामिन्दुमती व्याख्याकारः रामचन्द्रझाः, लघुशब्देन्दुशेखरव्याख्याकारः जटाशंकरझाः प्रभृतयः।

यत्र केषांचिन्मते वैयाकरणेद्योतकारः मैथिलदार्शनिकादुद्योतकारादभिन्नः, उणादिसूत्रकारो शबरस्वामी मीमांसकाच्छबरस्वामिनोऽभिन्नः, लिंगानुशासनकारो वात्स्यायनोऽपि कामसूत्रकारद्वात्स्यायनार्ह्रिन्नः, किन्तु न्यायभाष्यकाराद्वात्स्यायनादभिन्नः, तत्रैव काशिकायां व्याकरणप्रकाशकारं महेशमिश्रं (15 श०) वृत्तिप्रदीपकारं रामदेवमिश्रं वर्षोपवर्षोपाध्यायो तथा च पदमंजरीकारं हरदत्तमिश्रमपि केचित् मैथिलाचार्या एव स्वीकुर्वन्ति। आचार्यो सृष्टिधरः अष्टाध्यायाः मुख्यासु व्याख्यासु परिगणितायाः भाषावृत्तेः टीकाकारः, अस्य भाषावृत्त्यर्थविवृत्तिः उत्तमा ख्यातिलब्धा चास्ति। भागवृत्तेष्टीकाकारादभिन्नोऽपरः श्रीधरदासः द्वादशशतके विक्रमाब्दे सदुक्तिकर्णामृतं रचितवान्।

अन्येऽपि ये अनुद्धताः, किन्तु उल्लेखनीयाः वैयाकरणाः ग्रन्थकाराश्च सन्ति, तेषां दिग्दर्शनार्थं नामानि दीयन्ते यथा– शाब्दबोधविमर्श–फक्किकासूत्रार्थविमर्शशब्दरत्न– मनोरमा–परिभाषेन्दुशेखर– लघुशब्देन्दुशेखरादिग्रन्थानां व्याख्याकारः बुद्धिनाथझाः, संस्कृतव्याकरणोदयकारः जयमन्तमिश्रः, परमलघुकथा–भूषणकलयोः रचयिता शोभाकान्तजयदेवझाः शर्म्मा, प्रत्येकार्थप्रकाशिकाविवृत्तिकारः वेदानन्दझाः, उणादिरत्नकौमुदीकारः अर्जुनझाः, मनोरमाशब्दरत्नप्रकाशिकाकारः आद्याचरणझाः, परिभाषेस्दुशेखर–ग्रष्टाध्यायी–पाणिनीयशिक्षादीनां टीकाकारः श्रीनारायणमिश्रः, संस्कृतव्याकरणकारः मुनीश्वरझाः, लघुशब्देन्दुशेखरटीकाकारः ताराकान्तझा– माधवझाः – हर्षनाथमिश्रः – अनुप्रयुक्तसंस्कृतव्याकरणदिग्रन्थानां रचयिता मधुसूदनमिश्रः मध्यसिद्धान्तकौमुदीव्याख्याकारः कालीकान्तझाः, ध्वनिविज्ञान–वर्णसमाम्नाययोः कर्त्ता विधातामिश्रः, भूषणशब्दरत्नयोः प्रकाशकारः उदयकान्तझाः, श्लोकलघुकौमुदी– श्लोकसिद्धान्तकौमुद्योः प्रणेता सुरेशझाः शास्त्री, संस्कृत व्याकरोदयस्य प्रणेता जयमन्त मिश्र, महावैयाकरण माधस्य प्रणेता मुरलीधर मिश्र महावैयाकरण आचार्य रामचन्द्र मिश्र व्याकरणशास्त्रादि विधानां व्युत्पन्नां जटेश्वर झा कारकदर्शनकारः कलानाथझाः शाब्दिसिद्धान्तवृत्तिविचारयोः कर्त्ता कृष्णानन्दझाः, बालशिक्षासोपानकारः शशिनाथझाः कात्यायनवार्तिकसमीक्षाकारः सतीशचन्द्रझाः, व्याकरणशास्त्रे शब्दविमर्शस्य प्रणेता गंगानाथझाः, प्रौढ़मनोरमासमीक्षाकारः सुरेश्वरझाः, मध्यसिद्धान्तकौमुदीव्याख्याकारः अर्कनाथचौधरी, समासशक्तिदीपिकायाः नीलाव्याख्याकारः सदानन्दझाः, व्याकरणतत्त्वमंजरीकारः शंकरजीझा ध्वनितत्त्वसमीक्षाशक्ति–वृत्तिविचारयोश्च रचयिता उदयनाथझाः प्रभृतयः इदानीं राराजन्ते।

अन्येऽपि बहवः वैयाकरणः भूतवर्तमानकालयोः सन्ति मिथिलायां संजाताः वा, ये नात्र विस्तारभिया स्मृताः। अन्येषां प्राचीनाचार्याणां ग्रन्थकाराणां च नामानि बहुत्र प्राप्यन्ते। निबन्धावसानेऽत्र भर्तृहरेरिदं पद्यं स्मरणीयमस्ति यत्–

उपासनीयं यत्नेन शास्त्रं व्याकरण महत्।
प्रदीपभूतं सर्वासां विद्यानां यदवस्थितम्।। इति।
शिवकुमार मिश्रेण विवेचितं यथामति।
शोधसम्मतमाधृत्य विदामाकर्षं खलु।।

इति शुभम्।।